श्री महालक्ष्मी स्तवनं

ॐ लक्ष्मीं नौमि रमां ।
कमले ! त्वां कमनीयां वंदे हरि-रामां ।
ॐ लक्ष्मीं नौमि रमां ॥

धात्री त्वमन्नपूर्णा भरणी त्वं जगतां ।
पातक-हरणीं मातः ! नौमि वरद-हस्तां ॥1॥
ॐ लक्ष्मीं नौमि रमां ॥

अंबुज-नयनां वंदे कंबु-गदादि-करां ।
वरुणालय-संभूतां करुणा-स्नेहभरां ॥2॥
ॐ लक्ष्मीं नौमि रमां ॥

पद्मालयां नतोऽहं पद्ममुखीं पद्मां ।
सद्मासि त्वं महसां त्वं विजयसेतमां ॥3॥
ॐ लक्ष्मीं नौमि रमां ॥

दह दारिद्र्-यं दुःखं हर जालं विपदां ।
अन्न-दायिनीं वंदे महतां पूज्य-पदां ॥4॥
ॐ लक्ष्मीं नौमि रमां ॥

वंदे वैभव-दात्रीं सुंदरता-प्रतिमां ।
त्वामरविंदासीनां महेश्वरीं सौम्यां ॥5॥
ॐ लक्ष्मीं नौमि रमां ॥

दिव्य-विभूषण-भव्यां जननीमभिरामां ।
नारायणीं वरेण्यां वंदे सिंधुसुतां ॥6॥
ॐ लक्ष्मीं नौमि रमां ॥

नौमि महालक्ष्मीं वै भुवनानां प्रिय-मां ।
हिरण्मयीं श्रीरूपां कृपामयीं परमां ॥7॥
ॐ लक्ष्मीं नौमि रमां ॥

दोषं मार्जय मातः ! भक्तिः स्वीक्रियतां ।
तुभ्यं नमस्स्तवोऽयं सौभाग्यं तनुतां ॥8॥
ॐ लक्ष्मीं नौमि रमां ॥

स्तवनं देव्या लक्ष्म्याः वहतु मुदं नितरां ।
मातृकृपा हृत-दैन्या रमयतु विश्वधरां ॥9॥
ॐ लक्ष्मीं नौमि रमां ॥

इति श्रीहरेकृष्णमेहेर-प्रणीतं श्रीमहालक्ष्मी-स्तवनं संपूर्णं ।